# वैयाकरणसिद्धान्तकौमुदी

## हलन्तनपुंसकलिङ्गप्रकरणम् (०५)
## १०.०९.२०१२

# चकारान्ताः नपुंसकलिङ्गाः

- जायन्ते नव सौ, तथामि च नव, भ्याम्भिस्भ्यसां सङ्गमे
- षट्सङ्ख्यानि, नवैव सुप्यथ, जसि त्रीण्येव, तद्वच्छसि ।
- चत्वार्यन्यवचस्सु कस्य विबुधाः शब्दस्य रूपाणि तद्
- जानन्तु प्रतिभास्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः ॥

- गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
- असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥
- स्वम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः ।
- चत्वारि शेषे दशके रूपाणीति विभावय ॥

- तथा हि,
- गाम् अञ्चति इति विग्रहे ‘ऋत्विग्..’ आदिना क्विन् ।
- गतौ नलोपः ।
- ‘अनिदितां हल उपधायाः क्ङिति’ (६.४.२४) ।
- गोअच्
- ‘अवङ् स्फोटायनस्य’ (६.१.१२३) इत्यवङ् ।
- गव अच् इति कृते, सवर्णदीर्घे, चोः कुः इति कुत्वे, जश्त्वे, वैकल्पिकचर्त्वे गवाक्/गवाग् ।
- ‘सर्वत्र विभाषा गोः’ (६.१.१२२) इति प्रकृतिभावे, गोअक्/गोअग् ।

- पूर्वरूपे, गोऽक्/गोऽग् ।
- पूजायाम्,
- 'नाञ्चेः पूजायाम्' (६.४.३०) इति नलोपाभावः ।
- गोअञ्च् इति प्रातिपदिकात् सौ, सोः लुकि, चकारस्य संयोगान्तलोपे,
- नस्य कुत्वेन ङः, गवाङ्/गोअङ्/गोऽङ् ।

- अमि अपि एतान्येव नव ।

- औङः शी, भत्वाद् 'अचः' (६.४.१३८) इति अल्लोपः । गोची ।
- पूजायां तु, गवाञ्ची/ गोअञ्ची/गोऽञ्ची ।

- ‘जश्शसोः शिः’ (७.१.२०) ।
- शेः सर्वनामस्थानत्वात् नुम् ।
- ‘उगिदचां सर्वनामस्थानेऽधातोः’ (७.१.७०)
- गवाञ्चि/गोअञ्चि/गोऽञ्चि ।
- गतिपूजनयोः त्रीण्येव ।

- गोचा/गवाञ्चा/गोअञ्चा/गोऽञ्चा ।
- गवाग्भ्याम्/गोअग्भ्याम्/गोऽग्भ्याम्/गवाङ्भ्याम्/गोअङ्भ्याम्/गोऽङ्भ्याम् इत्यादि ।

- सुपि तु ङान्तानां पक्षे 'ङ्णोः कुक्टुक् शरि' (८.३.२८) इति कुक् ।
- गवाङ्क्षु/ गोअङ्क्षु/गोऽङ्क्षु /गवाङ्षु/गोअङ्षु/गोऽङ्षु/ गवाक्षु/गोअक्षु/गोऽक्षु/
- न च इह 'चयो द्वितीयाः शरि.. ' इति पक्षे ककारस्य खकारेण षण्णाम् आधिक्यं शङ्क्यम्, चर्त्वस्य असिद्धत्वात् ।
- 'नादिन्याक्रोशे पुत्रस्य' (८.४.४८) इति सूत्रे पठितम् इदं वार्तिकम् ।
- कुक्पक्षे तु तस्य असिद्धत्वात् जश्त्वाभावे पक्षे चयो द्वितीयादेशात् त्रीणि रूपाणि वर्धन्त एव ।
- एवं च नवाधिकशतम् इति सूत्रकारमतम्, वार्त्तिककारमते तु द्वादशाधिकशतम् ।

| | | | |
|---|---|---|---|
| सु = ९ | औ = ४ | जस् = ३ | १६ |
| अम् = ९ | औ = ४ | शस् = ३ | १६ |
| टा = ४ | भ्याम् = ६ | भिस् = ६ | १६ |
| ङे = ४ | भ्याम् = ६ | भ्यस् = ६ | १६ |
| ङसि = ४ | भ्याम् = ६ | भ्यस् = ६ | १६ |
| ङस् = ४ | ओस् = ४ | आम् = ४ | १२ |
| ङि = ४ | ओस् = ४ | सुप् = ९/१२ | १७/२० |
| | | | १०९/११२ |

- ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात् ।
- रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः ॥
- अश्व = ७, अक्षि = २, भूत = ५, परावृत्ते ५२७ । (‘अङ्कानां वामतो गतिः’)

# तकारान्ताः नपुंसकलिङ्गाः

- तकारान्तः नपुंसकलिङ्गः यकृत् शब्दः
- यकृत्, यकृती, यकृन्ति ।
- ‘पद्दन्..’ इति वा यकन् ।
- यकानि ।
- यक्ना/यकृता ।

- तकारान्तः नपुंसकलिङ्गः शकृत् शब्दः
- शकृत्, शकृती, शकृन्ति/शकानि ।
- शक्ना/शकृता ।

- तकारान्तः नपुंसकलिङ्गः ददत् शब्दः ।
- डुदाञ् दाने - शतृप्रत्ययान्तः ।
- दा लट्  ('वर्तमाने लट्' - ३.२.१२३)
- दा (शतृ) अत्  ('लटः शतृशानचावप्रथमासमानाधिकरणे' - ३.२.१२४)
- दा (शप्) अ अत्  ('कर्तरि शप्' - ३.१.६८)
- दा अत्  ('जुहोत्यादिभ्यः श्लुः' - २.४.७५)
- दा दा अत्  ('श्लौ' - ६.१.१०)
- द दा अत्  ('ह्रस्वः' - ७.४.५९)
- दद् अत्  ('श्नाभ्यस्तयोरातः' - ६.४.११२)

- ददत्, ददती

- ददत् (जस्) अस्
- ददत् (शि) इ ('जश्शसोः शिः' - ७.१.२०)
  - 'नाभ्यस्ताच्छतुः' ( इति नुम्निषेधे प्राप्ते,

# ४४४. वा नपुंसकस्य (७.१.७९)

- पदद्वयम् ।
- ‘इदितो नुम् धातोः’ (७.१.५८) इत्यतः ‘नुम्’ इति, ‘उगिदचां सर्वनामस्थानेऽधातोः’ (७.१.७०) इत्यतः ‘सर्वनामस्थाने’ इति, ‘नाभ्यस्ताच्छतुः’ (७.१.७८) इत्यतः ‘अभ्यस्तात्, शतुः’ इति च अनुवर्तते ।
- अभ्यस्तात् परः यः शता तदन्तस्य क्लीबस्य नुम् वा स्यात् सर्वनामस्थाने ।
- ददन्ति/ददति ।

- तकारान्तः नपुंसकलिङ्गः तुदत् शब्दः ।
- तुद व्यथने - शतृप्रत्ययान्तः ।
- तुद् लट्  ('वर्तमाने लट्' - ३.२.१२३)
- तुद् (शतृ) अत्  ('लटः शतृशानचावप्रथमासमानाधिकरणे' - ३.२.१२४)
- तुद् (श) अ अत्  ('तुदादिभ्यः शः' - ३.१.७७)
- तुदत्  ('अतो गुणे' - ६.१.९७)

- तुदत् औ
- तुदत् (शी) ई
  - असर्वनामस्थानत्वात् नुमि अप्राप्ते ,

# ४४५. आच्छीनद्योर्नुम् (७.१.८०)

- पदत्रयम् । आत्, शी-नद्योः, नुम् ।
- 'नाभ्यस्ताच्छतुः' (७.१.७८) इत्यतः 'शतुः' इति, 'वा नपुंसकस्य' इत्यतः 'वा' इति च अनुवर्तते ।
- अवर्णान्ताद् अङ्गात् परो यः शतुः अवयवः तदन्तस्य अङ्गस्य नुम् वा स्यात् शीनद्योः परतः ।
- तुदन्ती/तुदती ।

- तुदन्ति ।
  - सर्वनामस्थानत्वात् 'नपुंसकस्य झलचः' इति नुमागमः ।

- तकारान्तः नपुंसकलिङ्गः भात् शब्दः ।
- ‘भा दीप्तौ’ -शतृप्रत्ययान्तः ।
- भा लट् (‘वर्तमाने लट्’ - ३.२.१२३)
- भा (शतृ) अत् (‘लटः शतृशानचावप्रथमासमानाधिकरणे’ - ३.२.१२४)
- भा (शप्) अ अत् (‘कर्तरि शप्’ - ३.१.६८)
- भा अत् (‘अदिप्रभृतिभ्यः शपः’ - २.४.७२)
- भात् (‘अकः सवर्णे दीर्घः’ - ६.१.१०१)

- भात् । भाती/भान्ती । भान्ति ।

- तकारान्तः नपुंसकलिङ्गः पचत् शब्दः ।
- पच् लट्        ('वर्तमाने लट्' - ३.२.१२३)
- पच् (शतृ) अत्        ('लटः शतृशानचावप्रथमासमानाधिकरणे' - ३.२.१२४)
- पच् (शप्) अ अत्        ('कर्तरि शप्' - ३.१.६८)
- पचत्        ('अतो गुणे' - ६.१.९७)

- पचत् औ
- पचत् (शी) ई
  - 'आच्छीनद्योर्नुम्' इति विकल्पेन नुमि प्राप्ते,

# ४४६. शप्श्यनोर्नित्यम् (७.१.८१)

- पदद्वयम् । शप्-श्यनोः, नित्यम् ।
- ‘नाभ्यस्ताच्छतुः’ (७.१.७८) इत्यतः ‘शतुः’ इति, ‘आच्छीनद्योर्नुम्’ (७.१.८०) इति च अनुवर्तते ।
- शप्श्यनोः आत्परो यः शतुः अवयवः तदन्तस्य नित्यं नुम् स्यात् शीनद्योः परतः ।
- पचन्ती ।
- पचन्ति ।

- तकारान्तः नपुंसकलिङ्गः दीव्यत् शब्दः ।
- दिव् लट् ('वर्तमाने लट्' - ३.२.१२३)
- दिव् (शतृ) अत ('लटः शतृशानचावप्रथमासमानाधिकरणे' - ३.२.१२४)
- दिव् (श्यन्) य अत् ('दिवादिभ्यः श्यन्' - ३.१.६९)
- दीव् य अत् ('हलि च' - ८.२.७७)
- दीव्यत् ('अतो गुणे' - ६.१.९७)

- दीव्यत् । दीव्यन्ती । दीव्यन्ति ।